अतीव द्वारकां रम्यां शतयोजनविस्तृताम् ॥
ब्रह्मादीनाञ्च नगरं विजित्य च विराजिताम् ।
तेजसाच्छादितां सूर्य्यं रत्नानाञ्च परिष्कृताम् ॥
वासुदेव उवाच ।
पैत्रकीतीर्थतुल्या सा किं तीर्थं द्वारकापरम् ।
सर्व्वतीर्थपरा श्रेष्ठा द्वारका बहुपुण्यदा ॥
यस्याः प्रवेशमात्रेण नराणां जन्मखण्डनम् ॥
दानञ्च द्वारकायाञ्च श्राद्धञ्च देवपूजनम् ।
चतुर्गुणञ्च तीर्थानां गङ्गादीनाञ्च भूमिप ! ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

द्वारकेशः, पुं, (द्वारकाया नगर्य्या ईशः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥

द्वारदातुः, पुं, (द्वारं ददातीति । दा+तुन् ।) वरदातुः । भूमीसहवृक्षः । इति भावप्रकाशः ॥

द्वारपालः, त्रि, (द्वारं पालयतीति । पालि+ “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) द्वाररक्षकः । दरवान् । इति पारस्य भाषा । तत्पर्य्यायः । प्रतीहारः २ द्वाःस्थः ३ द्वाःस्थितः ४ दर्शकः ५ । इत्यमरः । २ । ८ । ६ ॥ वेत्रधारकः ६ दौःसाधिकः ७ वर्त्तरूकः ८ गर्व्वाटः ९ दण्डवासी १० । इति त्रिकाण्डशेषः ॥ द्वारस्थः ११ क्षत्ता १२ द्वारपालकः १३ दौवारिकः १४ वेत्री १५ उत्सारकः १६ दण्डी १७ । इति हेमचन्द्रः ॥ अस्य विवरणं दौवारिकशब्दे द्रष्टव्यम् ॥

द्वारपालकः, पुं, (पालयतीति ण्वुल् । द्वाराणां पालकः । यद्वा, द्वारपाल+स्वार्थे कन् ।) द्वारपालः । इति शब्दरत्नावली ॥

द्वारपिण्डी, स्त्री, (द्वारस्य पिण्डी पिण्डिकेव ।) देहली । इति जटाधरः ॥

द्वारबलिभुक्, [ज्] पुं, (द्वारदत्तं बलिं भुङ्क्ते इति । भुज्+क्विप् ।) वकः । इति त्रिकाण्डशेषः ॥

द्वारयन्त्रं, स्त्री, (द्वारबन्धकं यन्त्रं मध्यलोपी समासः ।) तालकम् । इति हेमचन्द्रः ।४।७१॥ ताला इति कुलुपं इति च भाषा ॥

द्वारवती, स्त्री, (द्वाराणि सन्त्यत्र । यद्वा, चतुर्वर्णानां मोक्षद्वाराणि सन्ति अत्रेति । द्वार+मतुप् । मस्य वः ।) द्वारका । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे । १० । ३४ ।
“कृतां द्वारवतीं नाम बहुद्वारां मनोरमाम् ॥”
तथा च तत्रैव,—
“चतुर्णामपि वर्णानां यत्र द्वाराणि सर्व्वतः ।
अतो द्वारवतीत्युक्ता विद्वद्भिस्तत्त्ववेदिभिः ॥”
इयं हि पीठस्थानानामन्यतमा । अत्र भगवती रुक्मिणीरूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ६९ ।
“रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ॥”)

द्वारस्थः, पुं, (द्वारे तिष्ठतीति । स्था+कः ।) द्वारपालः । इति हेमचन्द्रः । ३ । ३८५ ॥ (द्वारस्थिते, त्रि । यथा, कथासरित्सागरे ।१८।११६।
“सुप्ते च तस्मिन् द्वारस्थो जागरामास स द्विजः ॥”)

द्वारावती, स्त्री, (द्वाराणि प्रशस्तबहुलप्रतीहाराः सन्त्यत्र । द्वार+मतुप् मस्य वः । निपातनात् पूर्व्वदीर्घश्च ।) द्वारका । इति हेमचन्द्रः ।४।४६॥
“अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ॥
एतास्तु पृथिवीमध्ये न गण्यन्ते कदाचन ।
पुरी द्वारावती विष्णोः पाञ्चजन्योपरिस्थिता ॥
मुक्तिदा एताः सर्व्वाश्च एकत्र गणिताः सुरैः ।
यानि यानि च क्षेत्राणि काशीप्राप्तिकराणि षट् ॥”
इति भूतशुद्धितन्त्रम् ॥

द्वारिकः, पुं, (द्वारं पाल्यत्वेनास्त्यस्येति ठन् ।) द्वारपालः । इत्यमरटीकासारसुन्दरी ॥ (यथा, पञ्चतन्त्रे । ३ । ८५ ।
“यो मूर्खं लौल्यसम्पन्नं राजद्वारिकमाचरेत् ।
मिथ्यावादं विशेषेण तस्य कार्य्यं न सिध्यति ॥”)

द्वारिका, स्त्री, (प्रशस्तानि द्वाराणि सन्त्यास्यामिति । ठन् टाप् च ।) द्वारकापुरी । इति शब्दरत्नावली ॥

द्वारी, [न्] त्रि, (द्वारं पाल्यतयास्त्यस्येति इनिः ।) द्वारपालः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १२६ । १० ।
“द्वारिणं तापसा ऊचू राजानञ्च प्रकाशय ॥”)

द्वाविंशतिः, स्त्री, (द्व्यधिका विंशतिरिति । “द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ।” ६ । ३ । ४७ । इति आत्प्रत्ययः ।) द्व्यधिकविंशतिः । इति व्याकरणम् ॥ बाइश इति भाषा । (यथा, महाभारते । ७ । ४६ । १८ ।
“कर्णो द्वाविंशतिं भल्लान् कृतवर्म्मा चतुर्द्दश ॥”)

द्वासप्ततिः, स्त्री, (द्व्यधिका सप्ततिरिति ।“विभाषा चत्वारिंशत्प्रभृतौ सर्व्वेषाम् ।” ६ । ३ । ४९ । इति पाक्षिक आत्प्रत्ययः ।) द्विसप्ततिः । यथा, द्वासप्ततिश्च बन्ध्यायामिति ज्योतिस्तत्त्वम् ॥

द्वास्थः, पुं, (द्वारि तिष्ठतीति । स्था+“सुपिस्थः । ३ । २ । ४ । इति कः । “खर्परे शरि वा विसर्गलोपो वक्तव्यः ।” ८ । ३ । ३६ । इत्यस्य वार्त्तिकोक्त्या विसर्गस्य पाक्षिकलोपः ।) द्वारपालः । इत्यमरटीकायां भरतः ॥

द्वास्थितः, पुं, (द्वारि स्थितः । विसर्गस्य पाक्षिकलोपः ।) द्वारपालः । इत्यमरटीकायां भरतः ॥

द्वास्थितदर्शकः, पुं, (पश्यतीति । दृश्+ण्वुल् । द्वास्थितः सन् दर्शकः ।) दौवारिकः । इत्यमरटीकायां भरतः ॥

द्विः, व्य, द्वौ वारौ, इति सुच्प्रत्ययेन साध्यम् । (यथा, रामायणे । २ । १८ । ३० ।
“करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ॥”) सर्व्वनामान्तर्गतद्विशब्दस्य पुंसि रूपं द्वौ । स्त्रियां क्लीवे च द्वे । तद्वाचकानि यथा, पक्षः १ नदीकूलम् २ असिधारा ३ रामपुत्त्रः ४ चक्षुः ५ हस्तः ६ स्तनः ७ । इति कविकल्पलता ॥ सहचरौ यथा, इन्द्राग्नी १ नारदपर्व्वतौ २ अश्विनीकुमारौ ३ भार्य्यापती ४ । इति महाभारते वनपर्व्व ॥

द्विकं, क्ली, (द्वाभ्यां कायतीति । कै+कः ।) द्वयम् । यथा,—
“अशीतिभागं गृह्णीयान्मासाद्वार्द्धुषिकः शतात् ।
द्विकं शतं वा गृह्णानो न भवेदर्थकिल्बिषी ॥”
इत्याह्निकतत्त्वम् ॥
(द्वितीयेन रूपेण ग्रहणमिति । “तावतिथं ग्रहणमिति लुग्वा ।” ५ ।२ । ७७ । इति कन् पूरणप्रत्ययस्य च लुक् । द्वितीयके, त्रि । इति सिद्धान्तकौमुदी ॥)

द्विकः, पुं, (द्वौ कौ ककारवर्णौ यत्र ।) काकः । कोकः । इति मेदिनी । के, २६ ॥

द्विककारः, पुं, (द्वौ ककारौ यत्र ।) काकः । इति शब्दरत्नावली ॥

द्विककुत्, [द्] पुं, (द्वे ककुदौ यस्य ।) उष्ट्रः । इति हेमचन्द्रः । ४ । ३२० ॥

द्विगुः, पुं, षट्समासान्तर्गतसमासविशेषः । स तु संख्यापूर्व्वपदानां समासः । वोपदेवेनास्य गसंज्ञा कृता । स च त्रिविधः । तद्धितार्थः १ समाहारः २ उत्तरपदपरश्च ३ । तद्धितार्थोऽपि द्विविधः । तद्धितप्रत्ययमात्रस्य अज्ञादेर्ष्णसादेर्व्वा अर्थे विषये इत्येकः । अपत्यार्थष्णादिकं त्यक्त्वा अजादेस्तद्धितस्यार्थे वाच्ये इत्यपरः । तद्धितार्थविषयो यथा, द्वयोर्मात्रोरपत्यं द्वैमातुरः । पञ्चानां नापितानामपत्यं पाञ्चनापितिः ॥ तद्धितार्थवाच्यो यथा, पञ्चभिर्गोभिः क्रीतः पञ्चगुः ॥ समाहारो यथा, त्रयाणां सखीनां समाहारः त्रिसखम् । समाहारे अदन्तानां स्त्रीत्वं पात्रादेस्तु क्लीवत्वम् ॥ उत्तरपदपरो यथा,— पञ्च गावो धनं यस्य स पञ्चगवधन इत्यादि । इति मुग्धबोधटीकायां दुर्गादासः ॥ (द्वौ द्वे वा गावौ यस्य इति विग्रहे गौणत्वे गोशब्दस्य ह्रस्वः । द्विगवस्वामिके, त्रि । यथा,—
“द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः ।
तत् पुरुष कर्म्म धारय येनाहं स्यां बहुव्रीहिः ॥”
इत्युद्भटः ॥)

द्विगुणं, त्रि, द्वाभ्यां पूरणम् । अङ्कद्वयाभ्यां घातः । इति लीलावती ॥ (यथा, आर्य्यासप्तशत्याम् । ४६९ ।
“रुद्धस्वरसप्रसवस्यालिभिरयं नतं प्रियं प्रति मे ।
स्रोतस इव निम्नं प्रतिरागस्य द्विगुण आवेगः ॥”)

द्विगुणाकृतं, त्रि, (द्विगुणं कर्षणं कृतम् । “संख्यायाश्च गुणान्तायाः ।” ५।४।५९। इति डाच् ।) वारद्वयकृष्टक्षेत्रम् । इत्यमरः । २ । ९ । ९ ॥ दोचसा भूँइ इति भाषा ॥

द्विजः, पुं, (द्विर्जायते इति । जन+“अन्येष्वपि दृश्यते ।” ३ । २ । १०१ । इति डः ।) संस्कृतब्राह्मणः । यथा,—
“जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।”
इति स्मृतिः ॥
सद्वृत्तब्राह्मणः । तल्लक्षणं यथा,—